प्रतिबुद्धंवस्तुआत्मतत्त्वंयेनसः प्रतिबोधप्रकारमाहद्वाभ्यां ३८ प्रतिसूक्ष्महवशादात्मत्वेनाभिमतादपि
पुत्रादेः मर्त्यः पित्रादिपुरुषोदेहादेर्दृष्टाप्रथगवस्थानाभावेपिभेदंस्पष्टमाह ३४ यथाल्मुकादिदा
नीरूपतः काष्ठात्स्वसंभवादग्नेः संभूतान् आत्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपिअन्यतावि
वक्षितेत्यर्थः तस्याप्यउपभिमानोस्तिउल्मुकाद्यस्तेवसिद्धोपितद्दाहकः
प्रकाशकश्चाग्निःप्रथगेव ३५ ॥

श्री॰
भा॰ त॰
टी॰
१०३

भूतादेः इन्द्रियेभ्यः पृथक् तस्मादपिजीवसंज्ञितात्पृथक् ब्रह्मसंज्ञितः तथाप्रधानादपितत्प्रवर्तकोभगवान्पृथग्गि
त्यर्थः उपाधितोविवेकमत्वातस्यैकमाह ४१ भूतेषुचतद्विधेषुतदात्मतोमहाभूतात्मनोधर्मभेदस्योपाधि
केतीसमदृष्टान्तमाह ४२ स्वयोनिषुकाष्ठेषुज्योतिरग्निः पृथगेवैषस्यात् दीर्घह्रस्वादिभेदान् ग्रहणतोदेहे ४३ स्वो
प्रास्यतीवस्ववद्धहन्ते दैवी देवस्यविस्रोपाधिप्रभावात तत्स्वरूपेणैवजित्वास्वरूपेणब्रह्मत्वेनावतिष्ठते ४४ इ
तिश्रीतृतीयेष्टाविंशोध्यायः २८ एकोनत्रिंशेभक्तियोगस्तत्वकथोच्यते कालस्यचबलेघोरासंसृतिनिवृत्तिभि

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१ सर्व
भूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षेतानन्यभावेन भूतेष्विव तदात्मता ४२ स्वयोनिषु यथा ज्यो
तिरेकः नानाप्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादिमां स्वां प्रकृतिं दै
वीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४४ इतिश्रीभागवते तृतीये कापिले
याष्टाविंशोऽध्यायः २८ देवहूतिरुवाच लक्षणं महदादीनां प्रकृतेः पुरु
षस्य च स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकं १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते भक्ति
योगस्य मे मार्गं ब्रूहि विस्तरतः प्रभो २ विरागो येन पुरुषो भगवन्सर्वतो भवेत् आचक्ष्व जीवलोक
स्य विविधा मम संसृतीः ३ कालस्येश्वररूपस्य परेषां च परस्य ते स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं
जनाः ४ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये श्रान्तस्य कर्मस्वनुविद्ध
याधिया त्वमाविरासीः किल योगभास्करः ५

रक्षणाय उक्तानुवाद पूर्वं भक्तिमार्गभेदात्प्रकृतिदाह्यं लक्षणं महदादीनां यथा सांख्येषु कथितं तथा येन लक्ष
णेन तत्पारमार्थिकं परस्पर विभक्तमित्यर्थः १ येन संसृतीनां व्याख्यानेन विगतरागो भवेत् ईश्वररूपस्य महा
प्रभवस्य तेन तदात्मकस्य यद्धेतोः यद्भयात्कुशलं पुण्यं कुर्वन्ति ४ अचक्षुषः अज्ञस्यातो मिथ्याभूते देहादौ
अभिमानिरहंकारो यस्यातः कर्मस्वनुविद्धया सक्तया धिया श्रान्तस्यातएवानाश्रये पारे तमसि संसारे चिरं प्रसु
प्तस्य लोकस्य प्रबोधाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि ५

गु॰
१०३

श्लक्ष्णं सुंदरं ६ मार्गैः प्रकारविशेषैः तानेवाह स्वभावश्च त्रयो गुणास्तेषां मार्गेण ह्यत्तिभेदेन भावोऽभिप्रायः फलसंकल्प
भेदाद्वृत्तिभेदइत्यर्थः ७ अभिसंधाय संकल्प्य संरंभी क्रुद्धः भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्यात् सत्रिविधोपि
तामसः ८ पृथग्भावो भेददर्शी ९ कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं कर्मार्पणं भगवत्प्रीतिमुद्दिश्येत्यर्थः
वा यष्टव्यमिति विधिसिद्धमुद्दिश्येत्यर्थः भेददर्शित्वं त्वर्चादावर्चनेनविष्णुपिसमानेनदेवतामसाधिभक्तिः एवं त्रयस्त्रयो भे
दाः तासत्वयोनरेत्तैषामेवंश्रवणकीर्तनाद्यायोपिनवधास्येवंनवनवभेदाः नदेवमगुणभक्तिरेकोशीतिभेदानिर्गु
णानभक्तिरेवविधैवतामाह द्वाभ्यां ११ अविच्छिन्नसंतता १२ अहैतुकी फलाभिसंधानशून्या अव्यवहिता भेददर्शनर

मैत्रेय उवाच इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ६ श्री
भगवानुवाच भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ७
अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ८ कर्मनिर्हारमुद्दिश्य
परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः ९ विषयानभिसंधाय यश ऐश्वर्यमेव वा
अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरवि
च्छिन्ना यथा गंगांभसोंबुधौ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भ
क्तिः पुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णंति विना मत्सेवनं
जनाः स एव भक्तियोगाख्य आत्यंतिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते निषेवि
तेनानिमित्तेन स्वधर्मेण महीयसा क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः १५ ॥ ॥

मेरहिता यमद्गुणश्रुतिमात्रेण मयि पुरुषोत्तमे मनोगतिरिति भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणमित्य
न्वयः लक्षणं स्वरूपं भक्ता नानिष्कामत्वेन तावे मुक्तमन्याये नाह १३ सालोक्यं मया सहैकस्मिन्लोके वासः सार्ष्टिः स
मानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपत्वं एकत्वं सायुज्यं उपास्ते अपि दीयमानमपि न गृह्णंति किं तत्कामनेत्यर्थः
किमितिन हिंस जनेन भक्तेरेव परमफलत्वादित्याह १४ ननु त्रैगुण्यं हित्वा ब्रह्मप्राप्तिः परमफलं प्रसिद्धं सत्येतत्
भक्तानुषंगिकमित्याह येन भक्तियोगेन मद्भावाय ब्रह्मत्वाय पर्यवेश्चता याभक्तेः साधनान्याह पंचभिः १५ निषेवितं
न सम्यगनुष्ठितेनानिमित्तेन स्वधर्मेणानितरेनेमित्तिकं च महीयसा श्रद्धादियुक्तेन क्रियायोगेन पंचरात्राद्युक्तेन जा एक्त

भागवतटीका ५८

श्री॰
भा॰ तृ॰
टी॰
१२४

महिंसत्वंमत्यादिमाहिंसस्यदर्शनादिभिः सत्वेनधैर्येणासंगमेनवैराग्येण १६ मद्धर्मणोभगवद्धर्मानुष्ठातुः पुरुषस्याश
यः चित्तंस्पवंचित्तेवशाश्रोदृष्टांतः १७ वातोरथःप्रापकोयस्यसः आशयात् स्थानात् आहेतेनैवात्मसात्कारोतीत्यविकारि
स्वमंयत्नतः चित्रमुडिदुसर्वभूतात्मदृष्ट्येवभातीतिवक्तुंकेवलेप्रतिमादिनिष्ठांनिंदत्याहसप्तभिः २० अर्चैवविडंवनंअ
नुकरणोमर्चायाहृदयायाविडंवनमितिवाअवज्ञायेलोडेषनिंदाक्रमेणचतत्र्भिर्निषिध्यते २१ हित्वाउपेक्ष्य २२ द्वि
षेहृन्नत्याक्रियया भूतग्रामावमानिनः नत्रिंदकस्यनहिंकिंअर्चादावर्चनमनर्थकमेवेत्याह २४ सर्वभूतेष्ववस्थितं
मांस्वहृदियावन्नवेदस्वहेतुकर्मकृत् कर्माविरोधनयथाक्काशयनेनकर्मनिष्ठायोअपिसपवावधिरित्युक्तंभवति २५

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषुमद्भावनयासत्वेनासंगमेनच १६ महतांवहुमानेनदी
नानामनुकंपया मैत्र्याचैवात्मतुल्येषुयमेननियमेनच १७ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्चमे
आर्जवेनार्यसंगेननिरहंक्रिययातथा १८ मद्धर्मणोगुणैरेतैः परिसंशुद्धआशयः पुरुषस्यांजसाभ्येति
श्रुतमात्रगुणंहिमां १९ यथावातरथोघ्राणमावृंक्तेगंधआशयात् एवंयोगरतंचेतआत्मानमवि
कारियत् २० अहंसर्वेषुभूतेषुभूतात्मावस्थितःसदा तमवज्ञायमांमर्त्यःकुरुतेर्चाविडंवनं २१ योमां
सर्वेषुभूतेषुसंतमात्मानमीश्वरं हित्वार्चांभजतेमौढ्याद्भस्मन्येवजुहोतिसः २२ द्विषतःपरकायेमां
मानिनोभिन्नदर्शिनः भूतेषुवद्धवैरस्यनमनःशांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे
नैवतुष्येर्चितोर्चायांभूतग्रामावमानिनः २४ अर्चादावर्चयेत्तावदीश्वरंमांस्वकर्मकृत् यावन्नवेदस्वहृ
दिसर्वभूतेष्ववस्थितं २५ आत्मनश्चपरस्यापियःकरोत्यंतरोदरं तस्यभिन्नदृशोमृत्युर्विदधेभयमुल्बणं
२६ अथमांसर्वभूतेषुभूतात्मानंकृतालयं अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७ जीवाःश्रेष्ठा
ह्यजीवानांततःप्राणभृतःशुभे ततःसचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २८ ॥

अंतरांतरंभेदंउदरमल्पमपिभेदंयः पश्यतीत्यर्थः यद्वाअंतरामध्येउदरंशरीरंअनुप्रविश्याहं तस्यभयंविदधेकरोमि २६
अथातःसर्वभूतेषुकृतवासंहेतः भूतानामात्मनसंतर्यामिणंअभिन्नेनचक्षुषासमदर्शनेनतत्रापियथोत्तरंमान्यादि
निशयः कर्तव्यइतिवक्तुंतारतम्यमाह सार्धैःषड्भिः २७ अजीवानामचेतनेभ्यः ततस्तेष्वपिप्राणभृतःप्राणादि
वृत्तिमंतः सचित्ताः ज्ञानवंतः इंद्रियाणांवृत्तयेयेषु २८ ॥ ॥

राम॰
१२४

इंद्रियवृत्तयोहरनाम्यमपिस्पृष्टः संन्येवनयाहिमहाभारते मोक्षधर्मेषु स्पर्शनेनस्वान्यश्यंतिपादपातिघ्रांतिपादपास्त
तइत्यादिप्रभृतास्पर्शनीद्रियहस्त्रिरेवानतेभ्यः स्पर्शवेदिभ्योरसवेदिनोमत्स्यादयः श्रेष्ठागंधविदोभ्रमरादयः श
ब्दविदः सर्पादयः २९ रूपभेदविदःकाकादयः उभयतोदंतायेषांतेश्वपदिभ्यस्ततोबहुपादाःतेभ्यश्चतुष्पादा
इत्यर्थः द्विपान्मनुष्यः ३० ततस्तेषुवर्णाः ३१ संशयछेत्तामीमांसकः ततोपिकेवलात्स्वधर्मकृत्तमुक्तसंगस
स्तस्यं फलं ब्रह्मणोधर्ममदोग्धानिष्कामइत्यर्थः ३२ अर्पिताअशेषाः क्रियाअर्थाः ततफलानियेनात्मादेहश्चयेनातप
वनिरंतरोव्यवहितः अकर्तुःकर्तृत्वाभिमानशून्यात् ३३ जीवानांकलयापरिकलनेनअंतर्यामितयाप्रविष्टइतिबु
द्धेत्यर्थः उक्तं भक्तियोगंद्वयोरंत्रेनाष्टांगयोगेनसहोपसंहरति ३४ हेमानविपुरुषंपरमेश्वरंयदन्यत्पुष्टंजीवस्यसे

ततोपिस्पर्शवेदिभ्यःप्रवरारसवेदिनः तेभ्योगंधविदःश्रेष्ठास्ततःशब्दविदोवराः २९ रूपभेदविदस्त
त्रततश्चोभयतोदतः तेभ्योबहुपदःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्म
णउत्तमः ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोभ्यधिकस्ततः ३१ अर्थज्ञात्संशयाछेत्तांततःश्रेयान्स्वकर्मकृत्
मुक्तसंगस्ततोभूयानदोग्धाधर्ममात्मनः ३२ तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरंतरः मय्यर्पितात्म
नःपुंसोमयिसंन्यस्तकर्मणः ३३ नपश्यामिपरंभूतमकर्तुःसमदर्शनात् मनसैतानिभूतानिप्रणमेद्बहु
मानयन् ईश्वरोजीवकलयाप्रविष्टोभगवानिति ३४ भक्तियोगश्चयोगश्चप्रणमेद्बहुमानयन् ययोरेक
तरेणैवपुरुषःपुरुषंव्रजेत् ३५ एतद्भगवतोरूपंब्रह्मणःपरमात्मनः परंप्रधानंपुरुषंदैवंकर्मविचेष्टितं
रूपभेदास्पदंदिव्यंकालइत्यभिधीयते ३६ भूतानांमहदादीनांयतोभिन्नदृशांभयं योंतःप्रविश्यभू

स्तीकालस्यस्वरूपंवावदेतितदाहसार्धेनन ३५ एतत्सर्वोनियंतृत्वयद्भगवतोरूपंकीदृशंप्रधानपुरुषात्मकंपरंत
द्व्यतिरिक्तंचएतदेवदैवमित्यभिधीयते कीदृशंकर्मणाविचेष्टितंनानासंसृतिलक्षणंयस्मात्तद्देवप्रेरितकर्मकृतःसं
सृतयोविचित्राइत्यर्थः ३५ एतदेवश्रीभगवतोरूपंकालइतिवाभिधीयते कीदृशंरूपभेदास्पदं वस्तूनामन्य
थात्वस्यास्पदमाश्रयः कथंगुणोक्तेहि कालात्गुणव्यतिकरइत्युक्तिवद्यतिचगुणव्यतिकरः कालइतिदिव्यम
द्भुतप्रभावं तदेवाहसार्धत्रयस्मात्रिः ३६ महदादीनांतत्तदभिमानिनांजीवानां भयहेतुत्वमाह यइतिभूतैरेवभूतान्य

स्कं ३ टी॰

२८ २८ ॥

श्री॰
भा॰ स्क॰
टी॰
२५४

अधियज्ञोयज्ञफलदाता कलयतांवशीकुर्वतां ३८ यद्भयाद्भीताः ४२ इंधेदीप्यते गिरिभिः भूमुदोनभः यन्नियमा
द्दात्स्यामंहरति ४३ महानात्मतत्वं अहंकारात्मकं स्वदेहं लोकत्वेननतुतेविस्तारयति गुणाभिमानिनोगुणनियंता
रः देवाब्रह्मादयः अस्यविश्वस्यसर्गादिषुवर्तंते ४४ अनुयुगंवारंवारमित्यर्थः जनेनपित्रादिनाजनंपुत्रादिजना
नयन् आदिकृत् मृत्युनान्तकमपिमारयन् अंतकरः अनादिरनंतोव्ययश्च ४५ इतिश्रीभावार्थेतृतीयस्कंधेएकोना

सविष्ण्वाख्योधियज्ञोसौ कालः कलयतांप्रभुः नचास्यकश्चिद्दयितोनद्वेष्योनचबांधवः ३८ आवि
शत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् यद्भयाद्वातिवातोयंसूर्यस्तपतियद्भयात् ३९ यद्भयाद्वर्षतेदेवो
भगणोभातियद्भयात् यद्वनस्पतयोभीता लताश्चौषधिभिः सह ४० स्वेस्वेकालेभिगृह्णंतिपुष्पा
णिचफलानिच स्रवंतिसरितोभीतानोत्सर्पत्युदधिर्यतः ४१ अग्निरिंधेसगिरिभिः भूर्नमज्जतिय
द्भयात् नभोददातिश्वसतांपदंयन्नियमाददः ४२ लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतं गुणाभि
मानिनोदेवाः सर्गादिष्वस्ययद्भयात् ४३ वर्ततेनुयुगंयेषांवशएतच्चराचरं सोनंतोंतकरःकालो
नादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्मृत्युनांतकं ४४ इतिश्रीभागवतेतृतीयस्कंधेएक
ोनत्रिंशोध्यायः २९ कपिलउवाच॥ तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमं कात्यमानोपि
बलिनावायोरिवघनावलिः १ यंयमर्थमुपादत्तेदुःखेनसुखहेतवे तंतंधुनोतिभगवान्पुमा
न्शोचतियत्कृते २॥

त्रिंशः २९ त्रिंशेनकामुकानादिलालनाकुलचेतसां कामिनांनामसोपायादधोगतिरुदीर्यते कालप्रभाव
वर्णनपूर्वकं वैराग्यायविचित्रकर्महेतोः संसृतिं अध्यायत्रयेण प्रपंचयति तस्यैतस्य १ बलिनः कालस्य
बलिनेतिपाठः कात्यमानोविचाल्यमानोपिवायोर्विक्रमंयथामेघपंक्तिर्नवेद विक्रममेवाह २ यंयमर्थंदुःखेन
प्रयासेनउपादत्ते अर्जयति तंतंभगवान्कालोधुनोति विनाशयति यत्कृतेयन्निमित्तम् २॥ ॥ राम॰
२५४

योगकृतेन: यद्यस्मात्सानुबंधस्य कलत्रादिसहितस्य संबंधीनि वस्तु इत्यन्वयः तत्र सम्बन्धार्थः चकारः दुर्मतित्वं दर्शयन्
न्: विशेषयति जंतुर्द्वाभ्यां ३ नारक्यां नरकप्रायादिभिर्गतायां ४ निरूढमूलेषु स्वतमनोरथेषु हृदयं यस्य बहु
मन्यते कृतार्थं हमिति श्लाघ्यमाने ऽदहनं पोषणं च तया दुराशय इत्यमाह ६ आक्षिप्तान्याकृष्टानि आत्मा इंद्रियाणि च यस्य कया
सतीनां पुंश्चलीनां रहसि रचितया संभोगादिरूपया मधुरभाषिणां शिशूनां आलापैश्च सुखवन्मन्यते इत्युत्तरेणान्व
यः ८ कूटा वित्तशाठ्यादिबहुला धर्मा येषु दुःखवशत्वात्तेषु ९ येषां पोषणेनाथ येयानि तान्पुष्णाति शेषभुक् भोगो

परभवस्य देहस्य सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ३ जंतुर्वै भव एतस्मि
न्यांयां योनिमनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोपि देहे वै न पुमांस्त्यक्तुमि
च्छति नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु निरूढ
मूलहृदय आत्मानं बहु मन्यते ६ संदह्यमानसर्वांग एषामुद्वहनादिना करोत्यविरतं मूढो दुरिता
नि दुराशयः ७ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया रहोरचितयालापैः शिशूनां कलभाषि
णां ८ गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः कुर्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ९ अर्थैरापा
दितैर्गुर्व्या हिंसयेतस्ततश्च तान् पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् १० वार्तायां लुप्यमा
नायामारब्धायां पुनः पुनः लोभाभिभूतो निःसत्वः परार्थे कुरुते स्पृहां ११ कुटुंबभरणाकल्पो मंदभा
ग्यो वृथोद्यमः श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः १२ ... कलत्राद
यस्तदा नाद्रियंते यथा पूर्वं कीनाशा इव गोजरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः
जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे १४ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् आमयाव्यप्र

पितस्य दुर्लभ इत्यर्थः १० वार्तायां जीविकायां निःसत्वः असमर्थः परार्थे परस्वे ११ अकल्पोऽसमर्थः १२
स्वैर्यथा द्रियंते तथादरं न कुर्वंति कीनाशाः कृपणाः कृषीवला गोजरं वृद्धबलीवर्दं १३ भ्रियमाणः पोष्यमा
णः १४ अवमन्यावज्ञया उपन्यस्तं समीपे प्रक्षिप्तं गृहपालः श्वा आहरन् भुंजानः आमयावी रोगी १५ उत्तारो
बहिर्निर्गतनेत्रः कफेन संरुद्धा नाड्यो यस्य कासश्वासाभ्यां कृत आयासो ... र इति शब्दं करोति १६ ॥ ॥

परिवीतः परिवेष्टितः वा वा मानानो वेयोना नेत्या हूयमानः १७ अस्तधीः नष्टमतिः भृत्यस्य उग्रपापाभ्यां देगतीतत्र यायाः
गतिमाह १८ सरभसं सक्रोधं यथा भवति तथा ईक्षणं ययोस्तौ दृष्ट्वा १९ आवृत्य विरुध्य २० तर्जनैः निर्भिन्नहृदयं यस्यासौ सन् चल
नीतिद्वितीयेनान्वयः २१ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्ता वालुका यस्मिन् निर्गत आश्रयः विश्रामस्थानमुदकं च यत्र
स्मिन् २२ यमसादनं नीतो भवति तत्रैव विशेषमाह २३ अध्वनः पथिनो योजनानां नवतिं नव च सहस्राणि याधिको

आत्मानमपि न चक्षुते कालपाशवशंगतः १७ एवं कुटुंबभर
णे व्यापृतात्मा अजितेंद्रियः म्रियते रुदतां स्वानामुरुवेदनयास्तधीः १८ यमदूतौ तदा प्राप्तौ भीमौ सर
भसेक्षणौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १९ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् नय
तो दीर्घमध्वानं दंड्यं राजभटा यथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः पथि श्वभिर्भक्ष्यमाण आ
र्तोऽघं स्वमनुस्मरन् क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कश
या च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके २२ तत्र तत्र पतन् श्रान्तो मूर्छितः पुनरुत्थितः यथा पापीयसा नी
तस्तमसा यमसादनं २३ योजनानां सहस्राणि नवतिं नवाध्वनः त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नो
ति यातनाः २४ आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोऽपि वा
२५ जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृन्तनं चाव
यवशो गजादिभ्यो भिदापनं पातनं गिरिशृंगेभ्यो रोधनं चाम्बुगर्तयोः २७ यास्तामिस्रान्धतामिस्रा रौर
वाद्याश्च यातनाः भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते
या यातना वै नारक्यस्ता इहाप्युपलक्षिताः २९ एवं कुटुंबं बिभ्राण उदरंभर एव वा विसृज्येहोभयं
प्रेत्य भुंक्ते तत्फलमीदृशम् ३०

द्वाभ्यां नीतः समस्यातनाः संदीपनादयो यातिवर्त्मभिः २४ आदीपने शज्वलनं प्राप्नोति स्वेन कृत्तमन्येन वा कृत्तं कि
श्चन स्वस्य मांसमत्तव्यमदनमित्यर्थः २५ आत्मनो वैशसं पीडा २६ भिदापणं भेदनं शावणानवैवत्स्वं संभावितम
आपिदृश्यमानत्वादित्याह २७ उभयं कुटुंबस्वदेहं जं यो पीर्जितं धनं भुंजते वहवः कर्ते च मरकायास्यातीत्याह

भूतद्रोहेणयद्धृतंतत् स्थूलंकलेवरमिहैवहित्वाकुशलादितरंपापंतदेवपाथेयंभोग्यंयस्य सः कुटुंबपोषणायमपि
विहायगच्छति ३० तस्यकुटुंबपोषणस्यशमलंपापं दैवेनेश्वरेणप्रापितंभुंक्ते ननुकुटुंबपोषणंविहितंस्वेतत्राह ३१
तमसोनरकस्यचरमंपदंस्थानंपुनः मनुष्यशरीरप्राप्तिकारणमाह ३२ मनुष्यदेहस्यप्राप्तेरर्वाक् यावत्योयातनाः
श्वादिशरीरेनस्तरकादियोनिपर्यंताः ताःसर्वाःक्रमेणसंप्राप्यभोगेनक्षीणपापःसन् अत्रपुनर्नरत्वंप्राप्नोतीत्यर्थः ३३ ॥ इ
ति श्रीभागवते तृतीयस्कंधे त्रिंशः ॥ ३० ॥ एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहांतरा मनुष्ययोनिसंप्राप्तिर्वर्ण्यतेऽजसीगतिः

एकःप्रपद्यतेध्वांतंहित्वेदंस्वकलेवरं कुशलेतरपाथेयोभूतद्रोहेणयद्भृतं ३० दैवेनासादितंतस्यशम
लंनिरयेपुमान् भुंक्तेकुटुंबपोषस्यहृतवित्तइवातुरः ३१ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः याति
जीवोंधतामिस्रंचरमंतमसःपदं ३२ अधस्तान्नरलोकस्ययावतीर्यातनादयः क्रमशःसमनुक्रम्यपुनरत्राव्र
जेच्छुचिः ३३ इतिश्रीभागवतेतृतीयस्कंधेकापिलेयोपाख्यानेकर्मविपाकोत्रिंशः ॥ ३० ॥ श्रीभगवानुवाच कर्मणा
दैवनेत्रेणजंतुर्देहोपपत्तये स्त्रियाःप्रविष्टउदरंपुंसोरेतःकणाश्रयः १ कललंत्वेकरात्रेणपंचरात्रेण
बुद्बुदं दशाहेनतुकर्कंधूःपेश्यंडंवाततःपरं २ मासेनतुशिरोद्वाभ्यांबाह्वंघ्र्याद्यंगविग्रहः नखलोमा
स्थिचर्माणिलिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवःसप्तपंचभिःक्षुत्तृडुद्भवः षड्भिर्जरायुणावी
तःकुक्षौभ्राम्यतिदक्षिणे ४ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते शेतेविण्मूत्रयोर्गर्तेसजंतुर्जंतुसंभव
वे ५ ॥ ॥

पुनरत्राव्रजेदित्युक्तंतदेवविशेषेणोपदर्शयति कर्मणेति दैवेनेतेनदेवमीश्वरः तदेवनेत्रंनेतृप्रवर्तकंयस्यप्रविष्टोभवति
१ कललंशुक्रशोणितंमिश्रितंभवतिबुद्बुदंवर्तुलंभवतिकर्कंधुर्बदरीफलंतदाकारंकठिनंपेशीमांसपिंडाकारः अं
डंवायोन्यंतरे २ बाह्वंघ्र्याद्यंगानांविग्रहोविभागः लिंगंचछिद्राणिचतेषामुद्भवः ३ जरायुणागर्भवेष्टनेनवीतः
प्रावृतः ४ मातुर्जग्धेनभक्षितेनान्नेनपानाद्यैश्चप्रथमानधातुर्वीर्यस्यजंतुर्नोसंभवोयस्मिन् असंमतेगर्तेविषमेशेतेन
यातुमार्कोडुवराणांनाडीवाप्यायनीनामतास्यांनिबध्यतेस्त्रीणांतथातस्याःशिरेसानिबद्धोपजायतेतेनाक्रमेनीयतपीतानि
स्त्रीणांगर्भोदरेतथा नेत्राप्यायतिदेहमोजंतुर्वृद्धिमुपैतीति ५ ॥ ॥
॥

श्री०
भा०तृ०
टी०
१०१

नत्राद्यैः कृमिभिः खादद्भिः सौकुमार्यात्कोमलत्वेन नद्दतानि सर्वाङ्गानि यस्य ६ उल्बणाः उत्कटैः सर्वाङ्गेषूत्थिता वेदना य
स्यथास्ते इत्यत्र हेतुरन्त्रावृतः ७ उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शिरोधरा ग्रीवा च यस्य ८ देहान्तरार्थं कर्मविधान ल
ब्धास्मृतिर्येन सः दीर्घं उच्छ्वासं यथा भवति तथा यातनामापन्नः सन् ९ सूतिर्हेतुभिर्वातैर्वेपितः सोदरः समानो
दरजन्मा विष्ठाविष्ठोत्थः कृमिरिव १० नाथमानो याचमानः ऽपत्यमान इति वा ऋषिः देहात्मदर्शी भीतः पुनर्गर्भ
वासात्सप्तवध्रयो येषां पञ्चभूता धातवो यस्य विक्लवया खिन्नया ११ उपसन्नं जगदिच्छयात्ते सेदृक्या गृहीतनानामूर्तेः भगव
तः चरणारविन्दं अकुतोभयं सोऽहं शरणं व्रजामि भुवि विचलदिति श्रीहरेः स्वावताराभिप्रायेण असतो मे तद्रूपा योग्या ये

कृमिभिः क्षतसर्वाङ्गः सौकुमार्यात्प्रतिक्षणं मूर्छां प्राप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुतीक्ष्णो
ष्णलवणरूक्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ७ उल्बेन संवृतस्त
स्मिंस्तैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ८ अकल्पः स्वाङ्गचेष्टायां शकुन्त इव
पञ्जरे तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं ९ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दति आरभ्य स
प्तमान्मासाल्लब्धबोधोऽपि वेपितः १० नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरैः नाथमान ऋषिर्भीतः सप्त
वध्रिः कृताञ्जलिः स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ११ जीव उवाच तस्योपसन्नमवितुं जगदिच्छ
यात्तनानातनोर्भुवि चलच्चरणारविन्दं सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा
१२ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायां आस्ते विशुद्धमविकारमखण्डबोध

वेदृशी गर्भवासलक्षणा गतिर्दर्शिता तस्य तवाऽसौ सोऽयं शरणं व्रजस्य कोवान स्वविशेषः येन सेव्यसेवकत्वमित्यपेक्षाया
माह यस्त्विति अत्र मां तदेहं भूतेन्द्रियाशयमयीं देहाकारपरिणतां मायामवलम्ब्याश्रित्य कर्मभिरावृतः स्वरूपश्च बद्ध
इवास्ते सोऽहं यस्तु देवस्तं नमामि कथंभूतमित्यपेक्षायां तत्त्वाशास्त्रविशेषदर्शयति आनन्दमाने हृदयमेवास्तिं प्रतीत
मेव मयाविकारं तच्छुद्धेनिरुपाधितत्वं ततः अखण्डबोधोऽयमनन्त न तत्त्वमपि वस्तुतः शुद्ध एव तु असंगोऽहं
उरुषं इत्यादिश्रुतेः तत्कथं युवयोरयं विशेष इत्यत आह १३ ॥

राम०
१०१

यः पंचभिर्भूतैरचितेन शरीरे अथवा यस्मिन्नेव सन्नः पतन्नस्तेन शरीरेण रहितोऽसंगः अनेन यथेंद्रियगुणार्थचिदात्मकः इंद्रिया
णि गुणा अर्था अनुविदाभासस्तत्तदात्मकः सोऽहं तं देहं चकर्षेते तेनेन शरीरेणाविकुंठमहिमायस्तं नमेवकुंठे निपाठे अव
रुचे कुंठनमावरणं यस्य महिमायस्येत्यर्थः नत्र हेतुः प्रकृतिपुरुषयोः परं नियंतारकत्वः ऋषिं सर्वज्ञं विद्याशक्तिमित्य
र्थः विद्याप्रतिहतो विशेषभावः ननु ज्ञानेनाथवंधो निवर्तिष्यते किं परमेश्वरवेदनेनेत्याह १४ यस्य मायया नश्वर
स्वतिः संसारसंबंधिनि पथि यन्तदतिश्रमेणतत् हतेनेन तेषेन वरवयं जीवो महत्तस्तस्यैवेश्वरस्यानुग्रहं विनापुनः
कया प्रकृतिलोकं निजस्वरूपं प्रपश्यामीति संभवेमेन अतिश्रमहेतुत्वेन पंथानं विशिनष्टि उरूणि गुणाः निमित्तानि
कर्माणि बंधनानि यस्मिन् ईश्वरप्रसादं विना ज्ञानाभावात्सएव सेव्य इत्यर्थः ईश्वर एव ज्ञानद इत्युपपादयन्नाह १५

यः पंचभूतरचितेन रहितः शरीरे कश्चायथेंद्रियगुणार्थचिदात्मकोऽहं तेनाविकुंठमहिमानमृषिं नमेऽहं
वंदे परं प्रकृतिपूरुषयोः पुमांसं १४ यन्मायया रुगुणकर्मनिबंधनेऽस्मिन् संसारिके पथि चरं स्तदतिश्रमेण न
दृष्टस्तिः पुनरयं प्रहरणि निजलोकं कुत्राव कया महदनुग्रहमंतरेण १५ ज्ञानं यदेतदद्धात्कतमः सदेव त्रैका
लिकं स्थिरचरेष्वनुवर्तितांशः तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वजैय जयेम १६
देहान्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः इच्छन्नितो विवसितुं गणयन्स्वमा
सान्निर्वास्यते कृपणधीर्भगवन्कदात १७ येनेदृशीं गतिमसौ दशमास्य ईश प्राहितः पुरुदयेन भ
वादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनांजलिमस्य कुर्यात् १८ ॥ ॥
सदेति त्रिकालविषयेऽस्मिन् तत् तेन विना कतमो मत्परदथान्नकोपि किंतु स देव ईश्वर एव अन्यः प्रकृतो जीवो दधात
तत्संभवमाह स्थिरेषु चरेषु चांतर्यामिरूपेणानुवर्तिनः अंशो येन तं भजेम सांख्यं तु इति विज्ञापयन्नाह १६ अन्यदे
हविवरे मातुरुदरकुहरे यः असृग्विण्मूत्रकूपः तस्मिन्पतितः जठराग्निना भृशं तप्तो देहो यस्य अत एव कृपणधी
र्यस्य इतो विवरात् विवसितुं निर्गंतुमिच्छन्स्वमासान् गणयन् स्वीकदात्र बहिर्निर्वास्यते तेन त्वत्तत्कृपकारस्मरणा
ह १७ येनेदृशीं गतिं ज्ञानं भवादृशेनेति निरुपमेनेत्यर्थः स्वकृतेनैव स्वयं तुष्यतु अंजलिमात्रं विना तत्कृतोपकार
कः प्रत्युपकारं कुर्यादित्यर्थः ईदृशीं गतिमित्यनेन जातेन रविलक्षणं ज्ञानं प्रार्थितवानित्युक्तं तदेव वैलक्षण्यमाह १८

स्सृष्टया धिषणया यदङ्ग
अयमपराधः पश्यत्यादि। सप्तवध्रिः जीवः स्वदेहे शरीरं भवे स्ववेदुःखे केवलं न तु पश्यत्यहं तु न तथेत्याह यत्सृष्टया धिषणयाहं तं पुराणमनादिं पुरुषं पश्ये बहि
र्मविवेकत्वानेन दमशरीरः दमइत्युपलक्षणं शमदमादियुक्तशरीरवान् आसमभवं तमेव पुराणमनादिं पुरुषं पश्ये बहि
र्हृदि मध्ये च पश्ये पश्यामीत्यन्वयः कथमपरोक्षतया प्रतीतं चैत्यमिवाहंकारस्पदं भोक्तारमिवेत्यर्थः विवेकज्ञान
स्य हृदि मध्ये च पश्ये पश्यामीत्यन्वयः १९ हे विभो बहुदुःखवासं यथा भवति तथा गर्भे वसन्न
पि ततो निर्गन्तुमिच्छामि न तु बहिः रूपयातेन गते शरीरे देवस्य तव माया उपसर्पति
प्राप्नोति यदनु यो मायामनु मिथ्यामतिः देहे ऽहंबुद्धिः संसृतिचक्रं च पुत्रकलत्रादि संबन्धाद्उपसर्पति २० तस्माद
देवस्थितोपि सुहृदात्मना सहायभूतेन पदाश्रयेण आत्मानं तमसः संसारादुद्धरिष्यामि अनेकरन्ध्रेणा

पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे यत्सृष्टयासं तमहं पुरुषं पुराणं पश्ये
बहिर्हृदि च चैत्यमिव प्रतीतं १९ सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरन्धकूपे य
त्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत् २० तस्मादहं विगतविक्लव उद्ध
रिष्य आत्मानमाशु तमसः सुहृदात्मनैव भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादितवि
ष्णुपादः २१ कपिल उवाच एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः सद्यः क्षिपत्यवाचीनं प्रसूत्यै
सूतिमारुतः २२ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हत
स्मृतिः २३ पतितो भुव्यसृङ्मिश्रः विष्ठाभूरिव चेष्टते रोरूयति गते ज्ञाने विपरीतां गतिं गतः २४ परच्छंद
न विदुषा पुष्यमाणो जनेन सः अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः २५ शायितोऽशुचिपर्यङ्के जन्तुः स्वे
दजदूषिते नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने २६ तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः

न गर्भवासदुःखं व्यसनमेतद्व्यसनं दुःखं यथा मे मा भविष्यत् न भविष्यति तथा कालतवाञ्च साधनसामग्रीं नञाह उप
सादितो हृदये प्रापितो विष्णोः पादो येन मया सः २१ दशमासाः परिच्छेदका यस्येति पूर्वलक्षणोपलक्षणत्वात्
ऋषिर्जीवः सद्यः तत्क्षणमेवावाङ् मुखं यस्य तमधोमुखं क्षिपति। २२ अवसृष्टः क्षिप्तः सन् २३ रोरूयते रो
दिति २४ परस्य छंदमभिप्रायमविदुषा जनेन पुष्यमाणः अनभिप्रेतं स्तन्यादौ रोदनेनोदरव्यथां कल्पयित्वा सर्पावर्तउदरव्य
थां रोदनेस्तन्यपानमित्यादि २५ आसनोत्थानचेष्टने चानीशः सन् रोरूयतीत्यनुषङ्गः २६ २० ॥ ॥

गमा॰ २१८

आवश्यकोमलत्वात् यस्मात् विगतं गर्भजातं ज्ञानं यस्य २७ पौगण्डं पंचवर्षाणि ततः पौगंडं यौवनादर्वाक् तत्र चाध्ययनादि
दुःखमाह सार्धैस्त्रिभिः २८ अलब्धाभीप्सितत्वेन शुचार्पितः प्राप्तः अज्ञानात् इद्धो दीप्तो मन्युर्यस्य सः देहेन सह वर्ध
मानेन मन्युना च विरोधं मानेन मन्युमाना च विरोधं करोति आत्मनोनाशाय नाशाय अज्ञानं प्रपंचयति २९ भूतैरारब्धे दे
हे असदाग्रहो अहं ममेति करोति ३० तदर्थं देहार्थं येन कर्मणा बद्धो देही अनुयाति पुनः अनुयाति अनुवर्तते इति वा
ददत् अविद्याकर्मभ्यां निबंधनं इति तथा ३१ यद्यसद्भिरधिष्ठितः सन् तेषां पथि शिश्नोदरमार्गे रमते आस्थितोपि यद्यस

इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः २८ सह देहेन मा
नेन वर्धमानेन मन्युना करोति विग्रहं कामी कामिष्वंताय चात्मनः २९ भूतैः पंचभिरारब्धे देहे देह्य
बुधोऽसकृत् अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं ३० तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं योऽनु
याति ददत्क्लेशमविद्याकर्मबंधनः ३१ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आस्थितो रमते जंतु
स्तमो विशति पूर्ववत् ३२ सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति
संक्षयं ३३ तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३४
न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३५ प्रजापतिः स्वां
दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३६ तत्सृष्टसृष्टसृष्टेषु को न्व
खंडितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया ३७ बलं मे पश्य मायायाः स्त्रीमय्या ज
यिनो दिशां या करोति पदाक्रांतान् भ्रूविजृंभेण केवलं ३८ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं

द्भिः सह रमते इति वा तर्हि यावन्नादेह आहत्येत्यादि पूर्वोक्तप्रकारेण नरकं प्रविशति ३२ असत्संगं निंदति त्रिभिः
३३ खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ३४ यथा च योषितां संगिनां संगतो बंधः तथान्यप्र
संगतो न भवेत् योषित्संगस्यानर्थहेतुत्वं प्रपंचयति सार्धेन ३५ रोहिद्भूतां मृगीरूपां सतीं ऋक्षरूपो मृगरूपः
निर्लज्जः सन् ३६ तेन ब्रह्मणा सृष्टा ये मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनुष्यादयः तेषु
को नु पुमान् अखंडितधीः अनाकृष्टमनाः ३७ दिशां जयिनः पुरुषानपि ३८ प्रतिलभ्य आत्मरूपेण लाभाय येन
प्रसभप्रसंगः या प्रमदा सा निरयद्वारं वदंति योगिनः ३९ ।।
।।

श्री भाग्व टी १.१५

शनैः शुश्रूषणादिमिषेणोपयाति योषिद्रूपा माया मृत्युं प्रतिकूलमीक्षेत स्त्रियं प्रसंगेन देवाहयामितिद्वाभ्यां ऋषभायती पुरुषवदाचरंतीं मम मायां वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४१ ४२ तामपत्यादिरूपं मृत्युं जानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वेन प्रतीयमानमपि यथा मृगस्य मृत्युः ४३ तदेवं जीवस्य संसृतिः प्रपंचिता तत्र च तस्य कर्मवशेन लोकात् लो[कांतर]गमने जन्ममरणे चोक्ते तत्रैवं शंक्यते तत्र व्यापकस्य कथं लोकात् लोकांतरगमनं नित्यस्य च कथं जन्ममरणे भोगे कर्मत्वेव सति जन्ममरणे चेष्यते तत्र अतः पुनरपि तस्य कर्मसंभव इति लोकांतरगमनं कर्मवशाद्भवतीत्याह देहेन जीवस्योपाधितया भूतेन जातेन लिंगदेहेन लोकात् रमनुव्रजन्नविरतं एव भोगं करोतीति कर्मणामस्मात्प्रतिकूलजन्मसंभवमाह ४४ जीवस्योपाधिः लिंगदेहः अ

योषयाति शनैर्माया योषिद्देवविनिर्मिता तमीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ४१ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४२ तामात्मनो विजानीयात्पत्यपत्यगृहात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४३ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् भुंजान एव कर्माणि करोत्यविरतं पुमान् ४४ जीवस्यानुगतो देहो भूतेंद्रियमनोमयः तन्निरोधोस्य मरणमाविर्भावस्तु संभवः ४५ द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ४६ यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४८ राम ॥ ॥

स्यात्मनो मृत्युं तृणैः कूपमिवावृतं ४१ यां मन्यते पतिं मोहान्मन्मायाविकारो देहः भोगायतनं तस्य निरोधः कार्यायोग्यता इति जीवस्य मरणमुच्यते आविर्भावस्तु संभवो जन्मोच्यते एतदेव दृष्टान्तेन स्पष्टयति ४५ द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेः द्रव्येक्षायां रूपादिदर्शने काचकामलादिदोषेणायद्रष्टृयोग्यता तदैव चक्षुर्द्रष्टुरिन्द्रियस्याप्ययोग्यता अनयोः स्थानवत्तद्गोचरायोग्यता तदेव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता एवं स्थूलदेहवैकल्ये लिंगदेहस्यैव कल्पे तदेव जीवस्य मरणं शरीरादपसर्पणं न स्वत इत्यर्थः ४६ क्वचिदयमेकः श्लोकाधिकः पठ्यते तत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदा योग्यता तत्पंचत्वं मरणं अहंमानादिदमेवाहमित्यभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः आदितिर्गोलकयोः द्रव्यावयवस्य रूपादेर्दर्शनेऽयोग्यता दोषेस

= ५२ हरि राम १५

यस्मादेवं तस्मात् जीवस्य जन्ममरणादि तस्मात् मरणात् संत्रासो न कार्यः जीवनेन च कार्पण्यं एवं कार्यसंभ्रमश्च जीवस्य न तु सर्वथा
अतः संगं त्यक्त्वैकत्र जीवितमित्याह ४७ सम्यक् पश्यति विचारयतीति तया बुद्ध्या मायाविरचिते लोके कलेवरं न्यस्य अ
भिमानं त्यक्त्वा सक्तिं चरेदित्यर्थः ४८ ॥ इति श्रीभागवते तृतीये टीकायां एकत्रिंशः ॥ ३१ ॥ द्वात्रिंशे सात्त्विकी धर्मे मूर्धा गतिरुदीर्यते
तत्त्वज्ञानविहीनस्य तस्य पुनरागतिः तदेवं पापकर्मणां गतिमुक्त्वा इदानीं काम्यकर्मणां गतिमाह चतुर्भिः यो गृह ए
वावसन् स्वान् धर्मान् दोग्धि दोहमाह काममर्थं च तान् दुग्धान् धर्मान् भूयः पिपर्ति पूरयति अनुतिष्ठति १ सोऽपि भगव
द्धर्मात् पराङ्मुखः सन् शक्रातान् देवान् पितॄंश्च यजते इत्याह २ तेषां श्रद्धयाक्रान्ता मतिर्यस्य सः पि

तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह ४७ सम्यग्दर्शनया बुद्ध्या
योगवैराग्ययुक्तया। मायाविरचिते लोके चरेन्न्यस्य कलेवरं ४८ ॥ इति श्रीभागवते महापुराणे तृतीये कापिलेयोपाख्या
ने स्वधर्मनिरूपणं नाम एकत्रिंशः ॥ ३१ ॥ कपिल उवाच ॥ अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे काममर्थं च धर्मं
स्वान् दोग्धि भूयः पिपर्ति तान् स चापि भगवद्धर्मात् काममूढः पराङ्मुखः यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धया
न्वितः २ तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ३ यदा चा
हीन्द्रशय्यायां शेतेऽनन्तासनो हरिः तदा लोका लयं यान्ति त एते गृहमेधिनां ४ ये स्वधर्मान्न दुह्यन्ति धीराः
कामार्थहेतवे निःसंगा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ५ निवृत्तिधर्मनिरता निर्ममा निरहंकृताः
स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ६ सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्यो
त्पत्त्यन्तभावनं द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते तावदध्यासते लोकं परस्य परचिन्तकाः ७ ॥ ॥

त्रर्थं देवार्थं व्रतं नियमो यस्य सः सोमपाः तत्र सोमं पीत्वेत्यर्थः ३ लोके तिष्ठति यावत् पुण्यं तया त्यागात्मुक्त्वा लोकानामपि
लयमाह प्रलयो भगवद्धर्मनिष्ठानां मुक्तिमेव गतिमाह त्रिभिः ४ ये त्वेवं कामार्थप्रयोजनाय स्वधर्मान् न दुह्यन्ति
निःसंगाः प्रशान्ताः स्वकार्याणि ईश्वरे समर्पितानि कर्माणि यैः ५ विश्वतोमुखं परिपूर्णं पुरुषं निवृत्तिनिष्ठा वक्रनिः सूर्यद्वारे
णानैर्मल्याः प्रयान्ति अत्र सद्यः मानः पुरुषोऽस्य आयान्मनिशक्त्या उपादानकारणं उत्पत्त्यन्तभावनं निमित्तकारणं परमेश्वर
इति द्वया हिरण्यगर्भोपासकानामपि क्रममुक्तिमाह त्रिभिः ६ परस्य हिरण्यगर्भस्य परिचिन्तकाः परमेश्वरस्य द्रष्टा

श्री० भा० टी० २२७

क्ष्मादीनिपंचभूतानिमनसेंद्रियाणिचअर्थाश्चशब्दादयः भूतादिनाहंकारएवंसादिभिः परिवृतंप्रतंब्रह्मांडंसंप्रतिहर्तुं
मिच्छुः सन अव्याकृतंनामीश्वरंपरंपराख्यंद्विपरार्धलक्षणंकाले ८ परेत्यदूरंगत्वाभगवंतंहिरण्यगर्भमनुप्रविष्टायेयोगिनः
प्रकृतंपरमानंदरूपंप्रधानमुत्कृष्टंचस्यतेनैवमहापर्यन्तेनि पूर्वेयतनस्तदागताभिमानाः तथाचश्रुतिः ब्रह्मणासहते
सर्वेसंप्राप्तेप्रतिसंचरेपरस्यान्तेकृतात्मानः परेशान्तिपरंपदमिति वत्तुपासकास्तसाक्षादेवतेप्राप्नुवंतिनतुक्रमेणअ
नत्वेवसाक्षाद्ब्रह्मेवभजेत्याह ९ अथतस्माद्भावोपितेप्रेमणाएवंतावद्भगवद्भक्तानांनिरंतरमेवतत्प्राप्नुवंतिभगवद्भेदेनहि
रण्यगर्भोपासकानांक्रमेणमुक्तिःभेदेनोपासनेनब्रह्मादयोप्यावर्तंतेकिंउतान्येइत्याहएतत्त्रिभिः योवेदगर्भः सोपिगुणव्यति
करेणानेहवैयथाचस्यापदाधिकृतः सन प्रजायते नकेवलंसएवैकः किंतु ऋषिभिर्मरीच्यादिभिः चसहजन्मानिहेन

क्ष्मांभोनलानिलवियन्मनइंद्रियार्थभूतादिभिः परिवृतंप्रतिसंजिहीर्षुः अव्याकृतंविशतियर्हिगुणत्रया
त्माकालंपराख्यमनुभूयपरःस्वयंभूः। ८ एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः
तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधानमुपयान्त्यगताभिमानाः ९ अथतंसर्वभूतानांहृत्पद्मेषुकृता
लयं श्रुतानुभावंशरणंव्रजभावेनभामिनि १० आद्यःस्थिरचराणांयोवेदगर्भःसहर्षिभिः योगीश्व
रैःकुमाराद्यैःसिद्धैर्योगप्रवर्तकैः ११ भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा कर्तृत्वात्सगुणंब्रह्मपुरु
षंपुरुषर्षभः १२ ससंसृत्यपुनःकालेकालेनेश्वरमूर्तिना जातेगुणव्यतिकरेयथापूर्वंप्रजायते १३ ऐ
श्वर्यंपारमेष्ठ्यंचतेपिधर्मविनिर्मितं निषेव्यपुनरायान्तिगुणव्यतिकरेसति १४ येत्विहासक्तमनसःकर्म
स्वश्रद्धयान्विताः कुर्वंतिप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः १५

हुः भेददृष्ट्याभिमानेनकर्तृत्वादितिचयथापूर्वत्वेहेतुः ११ निःसंगेननिष्कामेनकर्मणाकिंकृत्वाप्रजायतेअथमेपार
मेष्ठ्यमैश्वर्यंनिषेव्यपश्चात्प्रलयेसगुणंगुणाधिष्ठातारंप्रथमावतारंपुरुषं १२ संसृत्यप्राप्य १३ तेपिऋषिप्रभृतयो
स्वकर्मनिर्मितमैश्वर्यंनिषेव्य पुरुषेणसंसृत्ययथापूर्वंस्वाधिकारेणपुनरायान्तीत्यन्वयः १४ एवंब्रह्मोपासका
नामपिभेददर्शनाभिमानाभ्यामेवावृत्तिः तत्रकाम्यकर्मणांकिंवक्तव्यमितितान्निंदन्नाह षड्भिः येत्विहकर्मस्वासक्त
मनसः संतःअप्रतिषिद्धानिकाम्यानिनित्यानिचकर्माणिकृत्स्नानिकुर्वंतिश्रद्धयालोगदक्षिणेनयथाधूममार्गेणपितृ

१६ हरतिसंसारंमेधायस्य कथनीयाउरवोविक्रमायस्यतस्यमधुद्विषः कथायांविमुखाः संतोयेत्रैवर्गिकाः १७ येचाच्युत
स्यकथासुधांहित्वाशृण्वंतितेनूनंदैवेननिहताइत्यन्वयः १८ पितृलोकात्पुनःप्रजामनुप्रजादिषुश्मशा
नांतेगर्भाधानादारभ्यश्मशानांताःक्रियाःकुर्वतोयथोक्तकारिणइत्यर्थः कथंप्रजायंतेतदाह १९ ततस्तेपुन
रिमंलोकंप्रतिपतंतिविभ्रंशितउदयोभोगसाधनंयेषां २० परमेष्ठिनंपरमेश्वरंतस्यगुणानामाश्रयतेयाभक्त्यातयाभजते
चरणावेवसर्वस्वंयस्यतंतथाभजनइत्यर्थः २१ तदेवोपपादयति २२ यदास्यभक्तस्यचित्तंभगवद्गुणानुरागेणतस्मिन्नेवनि

रजसाकुंठमनसःकामात्मानोजितेंद्रियः पितॄन्यजंत्यनुदिनंगृहेष्वभिरताशयाः १६ त्रैवर्गिकास्ते
पुरुषाविमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः १७ नूनंदैवेनविहतायेचाच्युत
कथासुधां हित्वाशृण्वंत्यसद्गाथाःपुरीषमिवविड्भुजः १८ दक्षिणेनपथार्यम्णःपितृलोकंव्रजंति
ते प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः १९ ततस्तेक्षीणसुकृताःपुनर्लोकमिमंसति पतंतिवि
वशादेवैःसद्योविभ्रंशितोदयाः २० तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनं तद्गुणाश्रययाभक्त्याभज
नीयपदांबुजं २१ वासुदेवेभगवतिभक्तियोगःप्रयोजितः जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनं
२२ यदास्यचित्तमर्थेषुसमेष्विंद्रियवृत्तिभिः नविगृह्णातिवैषम्यंप्रियमप्रियमप्युत २३ सतदैवा
त्मानंनिःसंगंसमदर्शनं हेयोपादेयरहितमारूढंपदमीक्षते २४ ज्ञानमात्रंपरंब्रह्मपरमात्मेश्व
रःपुमान् दृश्यादिभिःपृथग्भावैर्भगवानेकईयते २५ एतावानेवयोगेनसमग्रेणेहयोगिनः युज्य
तेभिमतोह्यर्थोयदसंगस्तुकृत्स्नशः २६

श्चलंसदिंद्रियवृत्तिभिःवैषम्यमर्थेषुनगृह्णाति २३ तदैवात्मानंस्वप्रकाशमीक्षते कथंभूतंसमंचतद्दर्शनंचतत्
अतोनिःसंगंसंगाख्यवैषम्यभवनान्निःसंगत्वेहेतुर्हेयोपादेयरहितंततएव अतःपदेव्यवसितंप्राप्तंपरमानंदोह
मितिनिश्चयेप्राप्तमित्यर्थः समेष्वर्थेष्वपि तदेवब्रह्म दर्शयति २४ ज्ञानमात्रमेवपरंब्रह्मादिशब्दैःप्रसिद्धे
दृश्यादिभिः दृश्यद्रष्टृकरणादिभेदेनप्रकाशमानोपिज्ञानमात्रत्वेनसाम्येस्थितइत्यर्थः नत्वज्ञानमात्रस्यात्मनःस्वरूपता
तु नित्याप्राप्तमेवनिर्विकल्पमनेकसाधनसाध्येनयोगेनप्राप्यतेतदाह २५ युज्यतेप्राप्यतेप्रपंचसंगराहित्यंयोगफ
लमित्यर्थः ननुकथंप्रपंचादिप्रतीतिः प्रपंचोपाधिरहितंप्रकाशते प्रतीतेर्भ्रांतत्वादित्याह २६ ॥ ॥

श्री० भा० तृ० टी० १११

पराचीनैः पराङ्मुखैः शब्दादिधर्मा यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैव भाति न त्वर्थः पृथगस्तीत्यर्थः अर्थरूपप्र
स्तमेवोदाहरन्दर्शयति २७ अहंरूपः अहंकारः स च जीवस्यैव वपुरंडं त्रिवृत् त्रिगुणात्मकः पुनश्च भूतरूपेण पंचवि
धः इंद्रियरूपेणैकादशविधि स्वराट् जीवरूपः तस्य वपुरंडं जगत् वतीयतो येभ्यः महदादिभिस्तथावभाति न तु त
त्त्वतः किमित्येवेनं प्रत्येननाह २८ एतद्ब्रह्म उक्तं सर्वत्रैकत्वेन प्रत्यगात्मत्वेन संदेहपरम्भवदति २९ अनेन च ज्ञा
नयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह ३० नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योयो
गः तयोर्द्वयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दः उपलक्षणं ज्ञापको यस्य तदुक्तं गीतासु तेषामेवेति
मामेव सर्वभूतेषु भक्तिं लभते परामिति न तु ज्ञानयोगस्यात्मलाभः फलं शास्त्रेणावगम्यते भक्तियोगस्य तु भजनीयेश्व

ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २७ यथा महाना
हंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २८ एतद्वै श्रद्धया भक्त्या योगाभ्या
सेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति २९ इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्श
नं येनानुबुद्ध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३० ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्ये
क एवार्थो भगवच्छब्दलक्षणः ३१ यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भ
गवान् शास्त्रवर्त्मभिः ३२ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्षणैः आत्मेंद्रियजयेनापि
संन्यासेन च कर्मणां ३३ योगेन विविधांगेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्ति
मान् ३४ आत्मतत्त्वावबोधेन वैराग्येण दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३५ ॥

रशास्त्रैः उक्तं तयोरेकार्थत्वमित्याशंक्य दृष्टान्तेनोपपादयति ३२ यथा बहूनां रूपरसादीनां गुणानामाश्रयो गु
डक्षीरादिभिः एक एवार्थो मार्गभेदः पृथक्त्रिभिरिंद्रियैर्नाना प्रतीयते चक्षुषा शुक्लं इति रसनेन मधुरमिति स्पर्शेन शीत इति
तथा भगवानेव तत्तद्रूपेणावगम्यते शास्त्रमार्गैः तान्प्रपंचयति त्रिभिः ३३ क्रियया पूर्तरूपया क्रतुभिर्यागैः मर्षणं
मीमांसा आत्मेंद्रिययोर्जयेन ३३ उभयचिह्नेन सकामनिष्कामलक्षणेन तमेवाह य इति ३४ सकामधर्मप्रवृत्तिमा
नाद्यपिमितार्थः एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगेन समानार्थत्वमुक्त्वा
भक्तियोगमुपसंहरति ३५ ॥ ॥

राम
१११

चतुर्विधं त्रिगुणनिर्गुणभेदेन योऽन्तर्धावति उत्पत्तिनिधनादिकरोति ३९ अंगहेमातः उपदेशेनाधिकारिणो दर्शयति नैतदिति
स्तायपरोद्वेजकाय भिन्नाय इतरावाराय धर्मध्वजाय दम्भिकाय अधिकारिणश्चाह द्वाभ्यां एतच्छ्रवणकीर्तनपरस्यापि मम
प्राप्तिरेव फलमित्याह य इत्येषचकारः सोपि सत्पदवीमेति हि निश्चितं ३० इति श्रीभावार्थदीपिकायां तृतीयस्कंधे द्वात्रिंशो-
३२ अथ त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः ज्ञानलाभेन तन्मातुर्जीवन्मुक्तिरुदीर्यते विस्रस्तं मोहरूपं पटलमावर

प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जंतुषु ३९ जीवस्य संसृती
र्बह्वीरविद्याकर्मनिर्मिताः यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ४० नैतत्खलायोपदिशेन्नावि
नीताय कर्हिचित् न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ४१ न लोलुपायोपदिशेन्न गृहारूढचेतसे
नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ४२ श्रद्दधानाय भक्ताय विनीतायानसूयवे भूतेषु कृतमैत्रा
य शुश्रूषाभिरताय च बहिर्जातविरागाय शांतचित्ताय दीयतां निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः
४३ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४४ इति श्रीभा
गवते तृतीयस्कंधे द्वात्रिंशोऽध्यायः ३२ मैत्रेय उवाच एवं निशम्य कपिलस्य वचो जनित्री सा कर्द
मस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धिभू
मिं १ देवहूतिरुवाच अथाप्यजोऽन्तःसलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते गुणप्रवाहं सद
शेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २

णं यस्याः तत्त्वान्येव विषयः तेषामंकिता सिद्धिः साक्षात्कारं यस्य भूमिं देवं संप्रवर्तकं १ अथापीति वाक्यं नरपुन्नो
पि च वपुः केवलं दध्यौ न तु दृष्टवान् स च स्वयं यस्य तव जठराब्जजातः स भवानेव विश्वस्य सर्गादि विधत्ते न
तु तत्सर्गादिकर्तृकं कश्चिदस्ति एवंभूतस्त्वमेव नाथः अजठरे इत्यत इति त्रयाणामन्वयः कथंभूतं वपुः स
लिले न च हेतुः अन्तः सलिले शयानं कीदृशं भूतानि चेन्द्रियाणि चार्थाश्च शब्दादयः आत्मा च मयः एतन्मयं प
रब्रह्मसितार्थः अतः गुणानां प्रवाहो यस्मिंस्तत् अतः अशेषस्य कार्यकारणस्य बीजं कारणं २॥ ॥

श्री॰
भा॰नृ॰
टी॰
११३

कथंभूतो भगवान्सर्गादि वितथत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन सः शक्तिद्वारेण वितथत्तेन साक्षादित्यर्थः
यतः अनीहो तर्हि कथं नियोगः शक्तिद्वारेणापि कथं सर्गादि विधत्ते अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विध
त्ते आत्मनो जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः [illegible] कथमेक एव विविधान् भोगान् विदध्यात् अतर्क्याः
सहस्रमपरिमिताः शक्तयो यस्य ३ किं त्वया अस्मद्यस्योदरे एतद्विश्वमासीत् स त्वं मया जठरेण कथं धृतः
न त्वाश्चर्यमपि विश्वमेतद्व्याप्तं तत्राह वटपत्रे निःशेषं पादाङ्गुष्ठं पिबतीत्यङ्घ्रिपानः इदमपि शिशुत्वेन तद्देवमाये
निभवः ४ कथं वा नन्विमया प्रस्ताव तत्र जठरे धृतः किं तवात्रार्थं अवताराधिक्यावाविर्भूतोसीत्याह त्वं देहतंत्र
त्वः स्वीकृतमूर्तिः निरसितुं पापानां इष्टानां निदेशभाजां अस्माकं च विभूतये सशङ्क्ये आत्मपथोपलब्धये ज्ञानमार्गप्र

सएव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यस
हस्रशक्तिः २ सत्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् विश्वं युगान्ते वटपत्र एकः शेते स्म
मायाशिशुरंघ्रिपानः ३ त्वं देहतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये यथावतारास्त
व सूकरादयस्तथायमप्यात्मपथोपलब्धये ४ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणा
दपि क्वचित् श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ५ अहो बत श्वपचोतो गरीया
न्यज्जिह्वाग्रे वर्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ७॥ ॥

दर्शनाय पुनस्त्वद्दर्शनात् कृतार्थोसीति जठरे धृतः कैमुत्यन्यायेनाह ५ यन्नामधेयस्य श्रवणमनुकीर्तनं च तत्प्र
स्मात् श्वादिश्वादपि श्वानमत्तीति श्वादः सोपि सवनाय सोमयागाय कल्पते योग्यो भवति अनेन पूज्यत्वं लक्ष्यते
तद्रूपापदइति ६ अहो बत अस्याश्चर्यं यस्य जिह्वाग्रे तव नाम वर्तते स श्वपचोप्यतः अस्माद्देवहूतेः गरीयान् पूज्य इत्या
ह हेतोः वर्तते अनेनैव अतः इत्याह तप एव तपस्तेपुः कृतवन्तः जुहुवुः होमं कृतवन्तः सस्नुः तीर्थेषु स्ना
ताः आर्याः सदाचारवन्तः ब्रह्म वेदमनूचुः अधीतवन्तः त्वन्नामकीर्तनेन यस्मात् तेषां तदनुष्ठानं न श्रूयत इत्यर्थः यद्वा
जन्मान्तरे तैस्तपआदि सर्वं कृतमिति त्वन्नामकीर्तनेन महाभाग्योदयादवगम्यत इत्यर्थः ७॥ ॥ ॥ राम॰
११३

प्रसन्नकुंतोन्नविप्रस्यादेनेआत्मविमनसिसंविभाव्यसंविनेवेदोगर्भोयस्यसः ८ अविक्लवयागंभीरयावाचा ९ स्वसेवो
नमेमयोदितेनआस्थितेनानुष्ठितेनयशेकाष्ठांजीवन्मुक्तिमवरोत्स्यसिप्राप्स्यसि ९ अनहितःमन्मनसविहसः ११ अत्र
मतंश्रुत्वाज्ञात: १२ सरस्वत्याआपीडेप्रवाहेशिरःस्थानेसरस्वत्यानिपातेशुद्धेनैवसंवेष्टितेबिंदुसरसिसमाहितावभूव
कथंभूतासतीसमाहितानतदाह १३ अभीक्ष्णंत्रिषवणेषुअवगाहः स्नानंतेनकपिशान् पिंगलान् स्वतएवकुटिला
न् तथात्मानंदेहंचीरणांकृशंचबिभ्रतीसतीवदनेनवकिंचिद्निर्वाच्यशोकव्याकुलंचकारेतिषष्ठेनान्वयः १४ प्र

[illegible]

तेनात्मदेहेयस्यपरमौसंशयकुंतोतस्यात्मनिसंविभावो स्वतेजसाधरणगतप्रवाहेवंदेविलेकपिलं
वेदगर्भं ८ मैत्रेयउवाच इतिनोनाभिवानेवेकपालाख्यःपरपुमान् वाचाविक्लवयेत्याहमातरंमा
तृवत्सल ९ कपिलउवाच मार्गेणानेनमातस्तेसुसेवेनोदितेनमे आस्थितेनपरांकाष्ठामचिराद्वि
रोत्स्यसि १० श्रद्धत्स्वैतन्मतंमह्यंजुष्टंयद्ब्रह्मवादिभिः येनमामभयंयायामृत्युमृच्छंत्यतद्विदः ११ मैत्रेय
उवाच ११ इतिप्रदर्श्यभगवानसतीमात्मनोगतिं स्वमात्राब्रह्मवादिन्याकपिलोनुमतोययौ १२ सावा
पितनयोक्तेनयोगादेशेनयोगयुक् तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता १३ अभीक्ष्णावगाहक
पिशान्जटिलान्कुटिलालकान् आत्मानंचोग्रतपसाबिभ्रतीचीरिणंकृशं १४ प्रजापतेःकर्दमस्य
तपोयोगविजृंभितं स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिकैरपि १५ पयःफेननिभाःशय्यादांतरुक्म
परिच्छदाः आसनानिचहैमानिसुस्पर्शास्तरणानिच १६ स्वच्छस्फटिककुड्येषुमहामारकतेषुच र
त्नप्रदीपाआभांतिललनारत्नसंयुताः १७ गृहोद्यानंकुसुमितैरम्यंबहुमरद्रुमैः कूजद्विहंगमिथुनंगा
यन्मत्तमधुव्रतं १८ यत्रप्रविष्टमात्मानंविबुधानुचराजगुः वाप्यामुत्पलगंधिन्यांकर्दमेनोपलालितं १९

[illegible]

जापतेःकर्दमस्यतपोयोगाभ्यामतिप्रार्थितंस्वगार्हस्थ्यंहित्वापुत्र तेस्वरविहान्तरासती १५ यत्रगृहस्याहीरकोणानिभा
मुक्ताश्राः प्रा यथाआस्तरणानिभांतिदंतवरिनामचरकावस्त्राणिमयिपरिकराः आसनानिपीठादीनिसुस्पर्शान्यास्तर
णानियेषु १६ बहुरम्यं १८ यत्रोद्यानेप्रविष्टमात्मानंदेवहूतिरिति १९ इदंस्त्रीणामपिईप्सिततमंश्रमामिहतमेव
न् हित्वाआभिमानेन्यत्रारूढयोगस्यदुःसहत्वमाह २० नहवत्सेव २१ ॥
॥

श्री. भा.तृ. टी. २९६

निःस्पृहानिर्वासनावत्साविदुरः २२ कपिलःसुतोयदाहतद्भगवतोरूपंध्यायतीतदात्मानंविश्वतोमुखंसर्वगतंध्याय
तीब्रह्मण्येवस्थितमतिर्बभूवेतिद्वितीयेनान्वयः २३ केनध्यायतीविशुद्धेनमनसाविशुद्धेःकारणान्याह भक्तिप्रवाह
रूपेणयोगेनयुक्तानुष्ठानेनज्ञानेनैवयुक्तानुष्ठानेवबुद्धिमासूत्रके युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वप्ना
वबोधस्ययोगोभवतिदुःखहेति ब्रह्महेतुनाब्रह्मस्वत्वाधिदर्वा २४ विश्वतोमुखत्वेहेतुः स्वानुभूत्याप्रकाशेनतिरो
भूतेमायागुणैर्विशेषणैःपरिच्छेदोयस्य २५ कथंभूतेब्रह्मणिजीवानांसंश्रयेभगवतितस्याजीवंप्रतिमाह सार्धैः
त्रिभिः नदावतिवृत्ताः जीवापत्तिर्जीवभावोयस्यास्तस्याभावस्तत्वेनस्याद्विगतक्लेशाप्ताप्तनिहितस्त्वात्मानेजीवेन

तमेवध्यायतीदेवमपत्यंकपिलंहरिं बभूवाचिरतोवत्सानिःस्पृहानादृशोगृहे २२ ध्यायतीभगवद्रूपं
यदाहध्यानगोचरं सुतंप्रसन्नवदनंसमस्तव्यस्तचिंतया २३ भक्तिप्रवाहयोगेनवैराग्येणबलीयसा
युक्तानुष्ठानजातेनज्ञानेनब्रह्महेतुना २४ विशुद्धेनतदात्मानमात्मनाविश्वतोमुखं स्वानुभूत्यातिरो
भूतमायागुणविशेषणं २५ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये निवृत्तिजीवापत्तित्वात्क्षीणा
क्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमात् नसंस्मारतदात्मानंस्वप्नदृष्टमिवोत्थि
तः २७ तद्देहःपरतःपोषोप्यकृशश्चाध्यसंभवात् बभौमलैरवच्छन्नैःसधूमइवपावकः २८ स्वांगंत
पोयोगमयंमुक्तकेशंगतांबरं दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः २९ एवंसाकपिलोक्तेनमार्गेणाचिर
तःपरं आत्मानंब्रह्मनिर्वाणंभगवंतमवापह ३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं नाम्नासि
द्धपदंयत्रसासंसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यंमर्त्यमभूत्सरित् स्रोतसांप्रवरासौम्यसिद्धि

संसारेऽन्वयः ननुतथापिगुणानांविद्यमानत्वात्कथंप्रस्मरेत्तत्राह २६ नित्यारूढोलब्धप्रतिष्ठः समाधिर्यस्याभा
वस्तत्वेनस्मात्परावृत्तः प्रातीतोगुणनिमित्तोयस्याः सा २७ परतःपराभिरेवकर्दमस्यविद्याधरीभिः पोषणंयस्याधिर्मनो
व्यथानितदसंभवादकृशामलैरवच्छन्नापिबभौ २८ देवगुप्तंप्रारब्धकर्मणापालितंनिर्वाणंनिवृत्तक्लेशं ३१ हेसौम्यतस्यास्तत्
मर्त्यंशरीरंसरिदभूत् कथंभूतंयोगेनविधुताविलीनामर्त्यादैहिकाधातुमलायस्य कपिलोययाविस्तरेणतदेव
प्रपंचयतित्रिभिः ३२ ॥ राम ॥

राम. २९६

श्रीः
भा·तृ·
टी·
११४

समनुज्ञाप्यानुज्ञांप्राप्य ३३ दत्तमर्हणमवानिकेतनंचयस्मै ३४ उपशांत्यर्थंसमाहितोस्मिन्प्रकर
णार्थमुपसंहरति एतदिति ३५ तदेतत्पाठश्रवणफलमाह यइति ३६ सुपर्णकेतोगरु

कपिलोपिमहायोगीभगवान्पितुराश्रमात मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ ३३
सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४
आस्तेयोगंसमास्थायसांख्याचार्यैरभिष्टुतः त्रयाणामपिलोकानामुपशांत्यैःसमाहि
तः ३५ एतन्निगदितंतातयत्पृष्टोहंतवानघ कपिलस्यचसंवादोदेवहूत्याश्चपावनः
३६ यइदमनुशृणोतियोभिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यं भगवतिकृतधीःसु
पर्णकेतानुपलभतेभगवत्पदारविंदम् ३७

इतिश्रीभागवतेमहापुराणेतृतीयस्कंधे
पारमहंस्यांसंहितायांत्रयस्त्रिंशो
ध्यायः ३३

डध्वजेउपलभनेनप्राप्नोति ३७ ॥इतिश्रीभाग…टीकायांतृतीयस्कंधेत्रयस्त्रिंशोध्यायः॥३३॥शुभं
समाप्तश्चायंतृतीयस्कंधः शुभं

११४ तृतीयस्कंधपत्राणि

3